# shrIkAshIvishvanAthastotram

# શ્રીકાશીવિશ્વનાથસ્તોત્રમ્

## Document Information

Text title : kAshIvishvanAthastotram

File name : kAshIvishvanAthastotram.itx

Category : shiva, shankarAchArya

Location : doc_shiva

Author : Shamkaracharya

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Source : stutisanchayaH

Latest update : June 13, 2010

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2020

*sanskritdocuments.org*

# શ્રીકાશીવિશ્વનાથસ્તોત્રમ્

કણ્ઠે યસ્ય લસત્કરાલગરલં ગઙ્ગાજલં મસ્તકે
વામાઙ્ગે ગિરિરાજરાજતનયા જાયા ભવાની સતી ।
નન્દિસ્કન્દગણાધિરાજસહિતા શ્રીવિશ્વનાથપ્રભુઃ
કાશીમન્દિરસંસ્થિતોઽખિલગુરુર્દેયાત્સદા મઙ્ગલમ્ ॥ ૧॥

યો દેવૈરસુરૈર્મુનીન્દ્રતનયૈર્ગન્ધર્વયક્ષોરગૈ-
ર્નાગૈર્ભૂતલવાસિભિર્દ્વિજવરૈઃ સંસેવિતઃ સિદ્ધયે ।
યા ગઙ્ગોત્તરવાહિની પરિસરે તીર્થૈરસઙ્ખ્યૈર્વૃતા
સા કાશી ત્રિપુરારિરાજનગરી દેયાત્સદા મઙ્ગલમ્ ॥ ૨॥

તીર્થાનાં પ્રવરા મનોરથકરી સંસારપારાપરા-
નન્દા નન્દિગણેશ્વરૈરુપહિતા દેવૈરશેષૈઃ સ્તુતા ।
યા શમ્ભોર્મણિકુણ્ડલૈકકણિકા વિષ્ણોસ્તપોદીર્ઘિકા
સેયં શ્રીમણિકર્ણિકા ભગવતી દેયાત્સદા મઙ્ગલમ્ ॥ ૩॥

એષા ધર્મપતાકિની તટરુહાસેવાવસન્નાકિની
પશ્યન્પાતકિની ભગીરથતપઃસાફલ્યદેવાકિની ।
પ્રેમારૂઢપતાકિની ગિરિસુતા સા કેકરાસ્વાકિની
કાશ્યામુત્તરવાહિની સુરનદી દેયાત્સદા મઙ્ગલમ્ ॥ ૪॥

વિઘ્નાવાસનિવાસકારણમહાગણ્ડસ્થલાલમ્બિતઃ
સિન્દૂરારુણપુઞ્જચન્દ્રકિરણપ્રચ્છાદિનાગચ્છવિઃ ।
શ્રીવિશ્વેશ્વરવલ્લભો ગિરિજયા સાનન્દકાનન્દિતઃ
સ્મેરાસ્યસ્તવ ઢુણ્ઢિરાજમુદિતો દેયાત્સદા મઙ્ગલમ્ ॥। ૫॥ ।
કેદારઃ કલશેશ્વરઃ પશુપતિર્ધર્મેશ્વરો મધ્યમો
જ્યેષ્ઠેશો પશુપશ્ચ કન્દુકશિવો વિઘ્નેશ્વરો જમ્બુકઃ ।
ચન્દ્રેશો હ્યમૃતેશ્વરો ભૃગુશિવઃ શ્રીવૃદ્ધકાલેશ્વરો
મધ્યેશો મણિકર્ણિકેશ્વરશિવો દેયાત્સદા મઙ્ગલમ્ ॥ ૬॥

ગોકર્ણસ્ત્વથ ભારભૂતનુદનુઃ શ્રીચિત્રગુપ્તેશ્વરો
યક્ષેશસ્તિલપર્ણસઙ્ગમશિવો શૈલેશ્વરઃ કશ્યપઃ ।
નાગેશોઽગ્નિશિવો નિધીશ્વરશિવોઽગસ્તીશ્વરસ્તારક-
જ્ઞાનેશોઽપિ પિતામહેશ્વરશિવો દેયાત્સદા મઙ્ગલમ્ ॥ ૭॥

બ્રહ્માણ્ડં સકલં મનોષિતરસૈ રત્નૈઃ પયોભિર્હરં
ખેલૈઃ પૂરયતે કુટુમ્બનિલયાન્ શમ્ભોર્વિલાસપ્રદા ।
નાનાદિવ્યલતાવિભૂષિતવપુઃ કાશીપુરાધીશ્વરી
શ્રીવિશ્વેશ્વરસુન્દરી ભગવતી દેયાત્સદા મઙ્ગલમ્ ॥ ૮॥

યા દેવી મહિષાસુરપ્રમથની યા ચણ્ડમુણ્ડાપહા
યા શુમ્ભાસુરરક્તબીજદમની શક્રાદિભિઃ સંસ્તુતા ।
યા શૂલાસિધનુઃશરાભયકરા દુર્ગાદિસન્દક્ષિણા-
માશ્રિત્યાશ્રિતવિઘ્નશંસમયતુ દેયાત્સદા મઙ્ગલમ્ ॥ ૯॥

આદ્યા શ્રીર્વિકટા તતસ્તુ વિરજા શ્રીમઙ્ગલા પાર્વતી
વિખ્યાતા કમલા વિશાલનયના જ્યેષ્ઠા વિશિષ્ટાનના ।
કામાક્ષી ચ હરિપ્રિયા ભગવતી શ્રીઘણ્ટઘણ્ટાદિકા
મૌર્યા ષષ્ટિસહસ્રમાતૃસહિતા દેયાત્સદા મઙ્ગલમ્ ॥ ૧૦॥

આદૌ પઞ્ચનદં પ્રયાગમપરં કેદારકુણ્ડં કુરુ-
ક્ષેત્રં માનસકં સરોઽમૃતજલં શાવસ્ય તીર્થં પરમ્ ।
મત્સ્યોદર્યથ દણ્ડખાણ્ડસલિલં મન્દાકિની જમ્બુકં
ઘણ્ટાકર્ણસમુદ્રકૂપસહિતો દેયાત્સદા મઙ્ગલમ્ ॥ ૧૧॥

રેવાકુણ્ડજલં સરસ્વતિજલં દુર્વાસકુણ્ડં તતો
લક્ષ્મીતીર્થલવાઙ્કુશસ્ય સલિલં કન્દર્પકુણ્ડં તથા ।
દુર્ગાકુણ્ડમસીજલં હનુમતઃ કુણ્ડપ્રતાપોર્જિતઃ
પ્રજ્ઞાનપ્રમુખાનિ વઃ પ્રતિદિનં દેયાત્સદા મઙ્ગલમ્ ॥ ૧૨॥

આદ્યઃ કૂપવરસ્તુ કાલદમનઃ શ્રીવૃદ્ધકૂપોઽપરો
વિખ્યાતસ્તુ પરાશરસ્તુ વિદિતઃ કૂપઃ સરો માનસઃ ।
જૈગીષવ્યમુનેઃ શશાઙ્કનૃપતેઃ કૂપસ્તુ ધર્મોદ્ભવઃ
ખ્યાતઃ સપ્તસમુદ્રકૂપસહિતો દેયાત્સદા મઙ્ગલમ્ ॥ ૧૩॥

લક્ષ્મીનાયકબિન્દુમાધવહરિર્લક્ષ્મીનૃસિંહસ્તતો
ગોવિન્દસ્ત્વથ ગોપિકાપ્રિયતમઃ શ્રીનારદઃ કેશવઃ ।

ગઙ્ગાકેશવવામનાખ્યતદનુ શ્વેતો હરિઃ કેશવઃ
પ્રહ્લાદાદિસમસ્તકેશવગણો દેયાત્સદા મઙ્ગલમ્ ॥ ૧૪॥

લોલાર્કો વિમલાર્કમાયુખરવિઃ સંવર્તસંજ્ઞો રવિ-
ર્વિખ્યાતો દ્રુપદુઃખખોલ્કમરુણઃ પ્રોક્તોત્તરાર્કો રવિઃ ।
ગઙ્ગાર્કસ્ત્વથ વૃદ્ધવૃદ્ધિવિબુધા કાશીપુરીસંસ્થિતાઃ
સૂર્યા દ્વાદશસંજ્ઞકાઃ પ્રતિદિનં દેયાત્સદા મઙ્ગલમ્ ॥ ૧૫॥

આદ્યો ઢુણ્ઢિવિનાયકો ગણપતિશ્ચિન્તામણિઃ સિદ્ધિદઃ
સેનાવિઘ્નપતિસ્તુ વક્ત્રવદનઃ શ્રીપાશપાણિઃ પ્રભુઃ ।
આશાપક્ષવિનાયકાપ્રષકરો મોદાદિકઃ ષડ્ગુણો
લોલાર્કાદિવિનાયકાઃ પ્રતિદિનં દેયાત્સદા મઙ્ગલમ્ ॥ ૧૬॥ ।

હેરમ્બો નલકૂબરો ગણપતિઃ શ્રીભીમચણ્ડીગણો
વિખ્યાતો મણિકર્ણિકાગણપતિઃ શ્રીસિદ્ધિદો વિઘ્નપઃ ।
મુણ્ડશ્ચણ્ડમુખશ્ચ કષ્ટહરણઃ શ્રીદણ્ડહસ્તો ગણઃ
શ્રીદુર્ગાખ્યગણાધિપઃ પ્રતિદિનં દેયાત્સદા મઙ્ગલમ્ ॥ ૧૭॥

આદ્યો ભૈરવભીષણસ્તદપરઃ શ્રીકાલરાજઃ ક્રમા-
ચ્છ્રીસંહારકભૈરવસ્ત્વથ રુરુશ્ચોન્મત્તકો ભૈરવઃ ।
ક્રોધશ્ચણ્ડકપાલભૈરવવરઃ શ્રીભૂતનાથાદયો
હ્યષ્ટૌ ભૈરવમૂર્તયઃ પ્રતિદિનં દેયાત્સદા મઙ્ગલમ્ ॥ ૧૮॥

આધાતોઽમ્બિકયા સહ ત્રિનયનઃ સાર્ધં ગણૈર્નન્દિતાં
કાશીમાશુ વિશન્ હરઃ પ્રથમતો વાર્ષધ્વજેઽવસ્થિતઃ ।
આયાતા દશ ધેનવઃ સુકપિલા દિવ્યૈઃ પયોભિર્હરં
ખ્યાતં તદ્વૃષભધ્વજેન કપિલં દેયાત્સદા મઙ્ગલમ્ ॥ ૧૯॥

આનન્દાખ્યવનં હિ ચમ્પકવનં શ્રીનૈમિષં ખાણ્ડવં
પુણ્યં ચૈત્રરથં ત્વશાકવિપિનં રમ્ભાવનં પાવનમ્ ।
દુર્ગારણ્યમથોઽપિ કૈરવવનં વૃન્દાવનં પાવનં
વિખ્યાતાનિ વનાનિ વઃ પ્રતિદિનં દેયાત્સદા મઙ્ગલમ્ ॥ ૨૦॥

અલિકુલદલનીલઃ કાલદંષ્ટ્રાકરાલઃ
સજલજલદનીલો વ્યાલયજ્ઞોપવીતઃ ।
અભયવરદહસ્તો ડામરોદ્દામનાદઃ
સકલદુરિતભક્ષો મઙ્ગલં વો દદાતુ ॥ ૨૧॥

અર્ધાઙ્ગે વિકટા ગિરીન્દ્રતનયા ગૌરી સતી સુન્દરી
સર્વાઙ્ગે વિલસદ્વિભૂતિધવલો કાલો વિશાલેક્ષણઃ ।
વીરેશઃ સહનન્દિભૃઙ્ગિસહિતઃ શ્રીવિશ્વનાથઃ પ્રભુઃ
કાશીમન્દિરસંસ્થિતોઽખિલગુરુર્દેયાત્સદા મઙ્ગલમ્ ॥ ૨૨॥

યઃ પ્રાતઃ પ્રયતઃ પ્રસન્નમનસા પ્રેમપ્રમોદાકુલઃ
ખ્યાતં તત્ર વિશિષ્ટપાદભુવનેશેન્દ્રાદિભિર્યત્સ્તુતમ્ ।
પ્રાતઃ પ્રાઙ્મુખમાસનોત્તમગતો બ્રૂયાચ્છૃણોત્યાદરાત્
કાશીવાસમુખાન્યવાપ્ય સતતં પ્રીતે શિવે ધૂર્જટિ ॥ ૨૩॥

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં કાશીવિશ્વનાથસ્તોત્રમ્ ॥

Encoded and proofread by Nat Natarajan nat.natarajan at gmail.com, NA

*shrIkAshIvishvanAthastotram*
pdf was typeset on June 13, 2020

Please send corrections to *sanskrit@cheerful.com*